श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ सप्तचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तचत्वारिंशः सर्गः ॥

## सीतया रावणाय पत्युरात्मनश्च परिचयं दत्त्वा वनागमने कारणस्य प्रतिपादनं रावणेन तां स्वपट्टमहिषीपदे प्रतिष्ठापयितुं स्वविचारस्य प्रकटनं सीतया तस्य भर्त्सनं च

रावणेन तु वैदेही तदा पृष्टा जिहीर्षुणा।
परिव्राजकरूपेण शशंसात्मानमात्मना॥ **3.47.1** ॥

ब्राह्मणश्चातिथिश्चैष अनुक्तो हि शपेत माम्।
इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत्॥ **3.47.2** ॥

दुहिता जनकस्याहं मैथिलस्य महात्मनः।
सीता नाम्नास्मि भद्रं ते रामस्य महिषी प्रिया॥ **3.47.3** ॥

उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने।
भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी॥ **3.47.4** ॥

तत्र त्रयोदशे वर्षे राजामन्त्रयत प्रभुः।
अभिषेचयितुं रामं समेतो राजमन्त्रिभिः॥ **3.47.5** ॥

तस्मिन् सम्भ्रियमाणे तु राघवस्याभिषेचने।
कैकेयी नाम भर्तारं ममार्या याचते वरम्॥ **3.47.6** ॥

परिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे।
मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम्॥ **3.47.7** ॥

द्वावयाचत भर्तारं सत्यसन्धं नृपोत्तमम्।
नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये न कदाचन॥ **3.47.8** ॥

एष मे जीवितस्यान्तो रामो यदभिषिच्यते।
इति ब्रुवाणां कैकेयीं श्वशुरो मे स पार्थिवः॥ **3.47.9** ॥

अयाचतार्थैरन्वर्थैर्न च याञ्चां चकार सा।
मम भर्ता महातेजा वयसा पञ्चविंशकः॥ **3.47.10** ॥

अष्टादश हि वर्षाणि मम जन्मनि गण्यते।
रामेति प्रथितो लोके सत्यवाञ्शीलवाञ्शुचिः॥ **3.47.11** ॥

विशालाक्षो महाबाहुः सर्वभूतहिते रतः।
कामार्तश्च महाराजः पिता दशरथः स्वयम्॥ **3.47.12** ॥

कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत्।
अभिषेकाय तु पितुः समीपं राममागतम्॥ **3.47.13** ॥

कैकेयी मम भर्तारमित्युवाच द्रुतं वचः।
तव पित्रा समाज्ञप्तं ममेदं शृणु राघव॥ **3.47.14** ॥

भरताय प्रदातव्यमिदं राज्यमकण्टकम्।
त्वया तु खलु वस्तव्यं नव वर्षाणि पञ्च च॥ **3.47.15** ॥

वने प्रव्रज काकुत्स्थ पितरं मोचयानृतात्।
तथेत्युवाच तां रामः कैकेयीमकुतोभयः॥ **3.47.16** ॥

चकार तद्वचः श्रुत्वा भर्ता मम दृढव्रतः।
दद्यान्न प्रतिगृह्णीयात् सत्यं ब्रूयान्न चानृतम्॥ **3.47.17** ॥

एतद् ब्राह्मण रामस्य व्रतं धृतमनुत्तमम्।
तस्य भ्राता तु वैमात्रो लक्ष्मणो नाम वीर्यवान्॥ **3.47.18** ॥

रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा।
स भ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः॥ **3.47.19**॥

अन्वगच्छद् धनुष्पाणिः प्रव्रजन्तं मया सह।
जटी तापसरूपेण मया सह सहानुजः॥ **3.47.20**॥

प्रविष्टो दण्डकारण्यं धर्मनित्यो दृढव्रतः।
ते वयं प्रच्युता राज्यात् कैकेय्यास्तु कृते त्रयः॥ **3.47.21**॥

विचराम द्विजश्रेष्ठ वनं गम्भीरमोजसा।
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया॥ **3.47.22**॥

आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम्।
रुरून् गोधान् वराहांश्च हत्वाऽऽदायामिषं बहु॥ **3.47.23**॥

स त्वं नाम च गोत्रं च कुलमाचक्ष्व तत्त्वतः।
एकश्च दण्डकारण्ये किमर्थं चरसि द्विज॥ **3.47.24**॥

एवं ब्रुवत्यां सीतायां रामपत्न्यां महाबलः।
प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः॥ **3.47.25**॥

येन वित्रासिता लोकाः सदेवासुरमानुषाः।
अहं स रावणो नाम सीते रक्षोगणेश्वरः॥ **3.47.26**॥

त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम्।
रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते॥ **3.47.27**॥

बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः।
सर्वासामेव भद्रं ते ममाग्रमहिषी भव॥ **3.47.28**॥

लङ्का नाम समुद्रस्य मध्ये मम महापुरी।
सागरेण परिक्षिप्ता निविष्टा गिरिमूर्धनि॥ **3.47.29**॥

तत्र सीते मया सार्धं वनेषु विचरिष्यसि।
न चास्य वनवासस्य स्पृहयिष्यसि भामिनि॥ **3.47.30** ॥

पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः।
सीते परिचरिष्यन्ति भार्या भवसि मे यदि॥ **3.47.31** ॥

रावणेनैवमुक्ता तु कुपिता जनकात्मजा।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम्॥ **3.47.32** ॥

महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम्।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता॥ **3.47.33** ॥

सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलम्।
सत्यसन्धं महाभागमहं राममनुव्रता॥ **3.47.34** ॥

महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम्।
नृसिंहं सिंहसङ्काशमहं राममनुव्रता॥ **3.47.35** ॥

पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम्।
पृथुकीर्तिं महाबाहुमहं राममनुव्रता॥ **3.47.36** ॥

त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम्।
नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा॥ **3.47.37** ॥

पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक्।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस॥ **3.47.38** ॥

क्षुधितस्य च सिंहस्य मृगशत्रोस्तरस्विनः।
आशीविषस्य वदनाद् दंष्ट्रामादातुमिच्छसि॥ **3.47.39** ॥

मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि।
कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि॥ **3.47.40** ॥

अक्षि सूच्या प्रमृजसि जिह्वया लेढि च क्षुरम्।
राघवस्य प्रियां भार्यामधिगन्तुं त्वमिच्छसि॥ **3.47.41** ॥

अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि।
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि॥ **3.47.42** ॥

यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि।
अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि॥ **3.47.43** ॥

कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि।
अयोमुखानां शूलानामग्रे चरितुमिच्छसि।
रामस्य सदृशीं भार्यां योऽधिगन्तुं त्वमिच्छसि॥ **3.47.44** ॥

यदन्तरं सिंहसृगालयोर्वने
यदन्तरं स्यन्दनिकासमुद्रयोः।
सुराग्र्यसौवीरकयोर्यदन्तरं
तदन्तरं दाशरथेस्तवैव च॥ **3.47.45** ॥

यदन्तरं काञ्चनसीसलोहयो -
र्यदन्तरं चन्दनवारिपङ्कयोः।
यदन्तरं हस्तिबिडालयोर्वने
तदन्तरं दाशरथेस्तवैव च॥ **3.47.46** ॥

यदन्तरं वायसवैनतेययो -
र्यदन्तरं मद्गुमयूरयोरपि।
यदन्तरं हंसकगृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च॥ **3.47.47** ॥

तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ।

हृतापि तेऽहं न जरां गमिष्ये
आज्यं यथा मक्षिकयावगीर्णम् ॥ **3.47.48** ॥

इतीव तद्वाक्यमदुष्टभावा
सुदुष्टमुक्त्वा रजनीचरं तम्।
गात्रप्रकम्पाद् व्यथिता बभूव
वातोद्धता सा कदलीव तन्वी ॥ **3.47.49** ॥

तां वेपमानामुपलक्ष्य सीतां
स रावणो मृत्युसमप्रभावः।
कुलं बलं नाम च कर्म च स्वं
समाचचक्षे भयकारणार्थम् ॥ **3.47.50** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥